PREFACE

The German language is richer in proverbs than any her language, living or dead. As this little book is ainly intended for Indian students, I have brought gether only those proverbs which have their counter-rts in Sanskrit or Bengali or which illustrate some rules German grammar. Wherever I have found corres-nding English proverbs, I have avoided giving literal iglish translations; in the case of Sanskrit, however, both eral translations and Sanskrit *ābhāṇakas* or *subhāṣitas* ve generally been inserted. No attempt has been en made to show "how far the comparison of the pro-rbs of one nation with those of other nations may be ade instructive to us, how much this comparison will l us severally about each." On the contrary the overbs of different peoples placed here side by side dicate clearly that human nature is much the same erywhere. Incidentally this little book may also be of me use to those Indians who begin the study of German a fairly advanced age and to whom dry-as-dust ntences about "my brother having lost his books and y sister having done her exercises" do not appeal at

UMĀ DEVI.

आभाणकमाला ।

1. Adler fangen keine Fliegen.

   ✓ Eagles do not catch flies.

   न खलु श्येना मक्षिकां गृह्णन्ति ।

   "न हि भवति मातङ्गो मशकस्य प्रतिस्पर्धी ।"

2. Alle land sind des Weisen Vaterland.

   All countries are mothercountry to the wise.

   ✓ "स्वदेशो देशान्तरमिति नेयं गणना विदग्धस्य पुरुषस्य ।"

3. Allzu viel ist ungesund.

   Too much of anything is good for nothing.

   "सर्वमत्यन्तगर्हितम् ।"

   "अति सर्वत्र वर्जयेत् ।"

   "सर्वमतिमात्रं दोषाय ।"

4. Alte soll man ehren,
   Junge soll man lehren,
   Weise soll man fragen,
   Narren soll man vertragen.

   The old we should honour,
   The young we should teach,

The wise we should ask,
The foolish we should endure.

वृद्धान् मानयेत्, यूनो विनयेत्, प्राज्ञाननुयुञ्जीत, मूर्खांश्च विषहेत ।

5. Alte Weg' und alte Freund'
allezeit die besten seind (sind).

Old ways and old friends are always the best.

पुरातनाः पन्थानः पुरातनानि च मित्राणि सदैव श्रेष्ठानि ।

6. "An der Rede erkennt man den Mann,
der Dumme fängt vom Wetter an"
"Vom Wetter reden nur Dummköpfe.

वचनेन विजानाति जनो जनस्य सारताम् ।
सङ्कथादौ सदा मूढो दिनावस्थां प्रजल्पति ॥

7. Andrer Leute Unglück nimmt man wenig
zu Herzen.

In the adversity of our best friends we often find something that does not displease us. (Rochefoucauld)

"महदपि परदुःखं शीतलं सम्यगाहुः ।"
"न नूनं परदुःखेन म्रियते कोऽपि सञ्जय ।"

8. Andrer Torheit sei deine Weisheit.

Learn wisdom by the follies of others.

मूढानां चरितं दृष्ट्वा स्वयं ज्ञानमुपार्जय ।
[आगला पडला तर मागला हुशार । म]

9. Arbeit macht das leben süss.

Work imparts sweetness to life.

कर्मैव योजयति मधुरिम्णा जीवितम् ।

10. Arbeit, Mässigkeit und Ruh'
schliesst dem Arzt die Türe zu.

Work, temperance and rest shut the door against the ysician.

उद्योगः, मिताचारः, श्रमश्च यत्र वर्तन्ते किं तत्र वैद्येन ।

11. Arbeit verkürzt die Stunde und verlängert das Leben.

Work shortens the hour and lengthens life.

कर्म ह्रसयति होरां वर्धयति चायुः ।

12. Armut ist keine Sünde.

Poverty is no crime.

न खलु दारिद्र्यं पातकेषु परिगण्यते ।*

13. Auf den Wind da folgt der Regen.

अनु वातं वर्षणम् ।

* Cf. however Mṛcchakatika I. 39.
सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाषते नादरात्
सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥

14. Auf Lachen folgt Weinen.
    Auf Freud' folgt Leid.

To-day glad, to-morrow sad.

हसितमनुबध्नाति रुदितम् ।

सुखमनुसरति दुःखम् ।

[यत हाँसि तत कान्ना, वले गेछे रामशन्ना । व]

15. Auf Regen folgt Sonnenschein.

After rain, comes sunshine.

"After storm, comes calm."

वर्षणमनुसरति सूर्यालोकः ।

16. Auge um Auge, Zahn um Zahn.

An eye for an eye, a tooth for a tooth.

"कृते प्रतिकृतं कुर्याद्धिंसिते प्रतिहिंसितम् ।"

17. Aus den Augen, aus dem sinn.

Out of sight, out of mind.

"दृश्यमाने भवेत् प्रीतिः सौहृदं नास्त्यपश्यतः ।"

["दृष्टी आड तें पृष्ठी आड । म]

18. Beispiele tun mehr als viele Wort' u
    Lehr'.

Example is better than precept.

"शासनात् करणं श्रेयः ।"

"वाचः कर्मातिरिच्यते ।"

19. Bescheidenheit ist das schönste Kleid.
Modesty is the best garment.

"लज्जा परं भूषणम्।"
लज्जा हि परमं वासः।

20. Borgen macht Sorgen.
Borrowing makes sorrowing.

ऋणं दुःखानुबन्धि हि।
[कर्ज करे ये, दुःख पाय से। व]

21. Borgen verdirbt die Freundschaft.
Borrowing ruins friendship.

ऋणेन नश्यति मैत्री।

22. Das Auge ist des Herzens Zunge.
The eye is the tongue of the heart.

चक्षुर्हि जिह्वा हृदयस्य।

23. Das beste Ross kann stolpern.
Auch der beste Gaul stolpert einmal.
अश्वरत्नमपि कदाचित् स्खलद्गति स्यात्।
जात्योऽप्यश्वः सकृत् स्खलति।

24. Das Feuer findet das Stroh.
"यतस्तु कक्षस्तत एव वह्निः।"

25. Das Glück hilft denen, die sich selbst helfen.

God helps those who help themselves.

“उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।”

26. Das Glück ist dem Kühnen hold.

Fortune favours the brave.

“साहसे श्रीः प्रतिवसति ।”

27. Dem Kühnen gehört die Welt.

Faint heart never won fair lady.

“वीरभोग्या वसुन्धरा ।”

28. Das Wetter erkennt man am Wind,
den Vater am Kind,
den Topf am Klang,
den Vogel am Gesang,
den Esel an den Ohren,
und an den Worten den Toren.

We recognise the weather by the wind, the father by the child, the pot by its sound, the bird by its song, the ass by its ears and the fool by his words.

पवनेन दिनावस्था विज्ञायते, पुत्रेण पिता, स्वनितेन पात्रम्, गीतेन विहगः, कर्णाभ्यां गर्दभः, वचनेन च मूर्खः ।

29. Den Freund erkennt man in der Not.

A friend in need is a friend in deed.

“आपत्सु मित्रं जानीयात् ।” “मित्राणां तत्त्वनिकषग्रावा विपत् ।”

30. Den Freund strafe heimlich, lobe ihn aber öffentlich.

Reprove your friend in private, but praise him before others.

रहसि शाधि सुहृदं प्रकाशं पुनः प्रशंस ।

31. Der Freunde Fehler soll man kennen, aber nicht nennen.

मित्राणां दोषा ज्ञातव्या न पुनः प्रकाशयितव्याः ।

32. Der Bauch lässt sich nicht mit Worten abspeisen.
Worte füllen den Bauch nicht.
न खलु मधुरैर्वचोभिः पूर्यत उदरम् ।
[शुधु मिष्टि कथाय चिँड़े भेजे ना । व]

33. Der Krug geht so lange zum Brunnen, bis er bricht.

The pitcher goes to the well till it breaks.

यावन्न भज्यते तावद् गच्छति कुम्भः कूपाय ।

34. Der Mensch denkt, Gott lenkt.
Man proposes, God disposes.

"अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः ।
अन्यथैव प्रपद्यन्ते दैवादिति मतिर्मम ।।"
"अन्यन्मानुषेण विभाव्यते, अन्यदेव च प्रस्तूयते दैवेन ।"

35. Der Schuster hat die schlechtesten Schuhe an.

"The shoemaker's wife and the smith's mare are the worst shod."

The nearer the church, the farther from God.

पादूकृत एव पादुका हीनतमा ।

[मयरार छेलेरा मिष्टि खेते पाय ना । गयलार छेलेरा दुध पाय ना । व कुंभारास मडकें धड नाही । म]

36. Der Weise weiss, was er sagt,
der Tor sagt, was er weiss.

The wise man knows what he says.

The fool says what he knows.

विचार्यैव ब्रवीति प्राज्ञः, मूढ़ो हि यद् यद् विजानाति तत् सर्वमुद्गिरति ।

37. Die Dummen haben das meiste Glück.

Fools have the best of luck.

मूर्खा एव विशेषतो भवन्ति भाजनं दैवानुग्रहस्य ।

[आनाड़ीर पाशा पड़े खासा । व]

38. Die dümmsten Bauern haben die dicksten Kartoffeln.

The most foolish peasant has the biggegst potatoes.

मूढतमा एव कर्षका लभन्ते सद्धमूतमानि सस्यानि ।

39. Die gezählten Schafe frisst der Wolf auch.
Counting your sheep does not keep the wolf away.

संख्यातमपि मेषं भक्षयत्येव वृकः ।

40. Die Liebe ist blind.
Love is blind.

अन्धः खलु मदनः ।

41. Die Schlange verbirgt sich oft unter Blumen.

The serpent often hides himself among the flowers.

प्रायेण हि पुष्पेष्वन्तराच्छादयत्यात्मानं सर्पः ।

42. Je höher das Gras, desto näher die Sense.
The higher the grass, the nearer the serpent.

यथा यथा उच्चैस्तराणि तृणानि तथा तथा नेदीयान् सर्पः ।

43. Die Wahrheit besteht, die Lüge vergeht.
Truth endures, falsehood perishes.

सत्यं तिष्ठति सर्वकालम्, असत्यं विनश्यति ।
"यत् सत्यं तदेव नित्यं भवति, यत्पुनर्मिथ्या तत्कालेनालीकं भवति ।"

44. Die Wände haben Ohren.

Walls have ears.

कुड्यानामपि सन्ति कर्णाः । (सावधानं रक्षणीयं रहस्यम् ।)

45. Die Zeit hat Flügel.
Time has wings.
कालस्य वर्तेते पक्षौ ।

46. Die Zeit ist eine grosse Lehrerin.
Time is a great teacher.
कालो हि महानुपदेशकः ।

47. Durch Schaden wird man klug.
Experience teaches fools.
भवति विज्ञतमः क्रमशो जनः ।
[केह देखे शेखे, केह ठेके शेखे । व]

48. Eile mit Weile.
Mit Eile ist nichts ausgerichtet.
Blinder Eifer schadet nur.
More haste, worse speed.
अतित्वरा कार्यनाशिका ।

49. Ein Bauer bleibt ein Bauer.
A peasant remains a peasant.
हालिको हालिक एव तिष्ठति (सर्वकालम्) ।

50. Dumm bleibt dumm.
A fool remains a fool.
मूढो मूढ एव तिष्ठति ।

51. Eine Antwort, sanft und lind,
stillet den Zorn geschwind.
A soft answer turneth away wrath.
सद्यः शमयति क्रोधमुत्तरं मधुरं मृदु ।

52. Eine Schwalbe macht keinen Sommer.
One swallow doesn't make a summer.
न खल्वेकः कोकिलो वसन्तं विदधाति ।

53. Ein Esel schilt den andern Langohr.
The pot calls the kettle grimy.
खरः खरं लम्बकर्ण इत्याक्रोशति ।
"यश्चोभयोः समो दोषो न तेनैकश्चोद्यो भवति ।"
[आनारस वले काँठाल भाइ तुमि वड़ खसूखसे । व
रसुन वले काँचकला भाइ तोमार वड़ खोसा । व
चालुनि वले छूँच तोर माथाय केन छेँदा । व]

54. Ein guter Name ist besser als bares Geld.
"जात्यादपि काञ्चनाद् यशः श्रेयः ।"
"अपि स्वदेहात् किमुतेन्द्रियार्थाद्
यशोधनानां हि यशो गरीयः ॥"

55. Ein gutes Wort kostet nichts.
√ Civility does not cost anything.
"वचने का दरिद्रता ।"

56. Einigkeit macht stark.

Unity gives strength.

संहतिर्बलसाधिका। "संहतिः कार्यसाधिका।"

"तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः।"

57. Ein Mann, ein Wort.

An honest man is as good as his word.

"मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम्।
मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद्दुरात्मनाम्॥"

"सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनापि जले लिखितमक्षरम्॥"

"रामो द्विर्नाभिभाषते।"

[मरद्का बात हातीका दांत। व]

58. Ein Narr lobt den andern.

One fool praises another.

"उष्ट्रकाणां विवाहेषु गर्दभाः खलु गायकाः।
परस्परं प्रशंसन्ति अहो रूपमहो ध्वनिः॥"

59. Ein Sperling in der Hand ist besser al
zwei auf dem Dache.

A bird in the hand is worth two in the bush.

60. Ein Taler in der Hand ist besser als eir
Uhr an der Wand.

61. Besser heute ein Ei als morgen ein Küchlein.

62. Ein lebender Esel ist besser als ein totes Pferd.

"वरमद्य कपोतः श्वो मयूरात् ।"

"वरं तत्कालोपगता तित्तिरी न तु दिवसान्तरिता मयूरी ।"

"वरं सांशयिकान्निष्कादसांशयिकः कार्षापणः ।"

वरं जीवन् गर्दभो न पुनर्मृतो घोटकः ।

63. Ein Tor Kann mehr fragen als hundert Weise beantworten können.

One fool can ask more questions than a hundred men can answer.

एको मूढस्तावतः प्रश्नान् पृच्छेद् यावतः शतमपि प्राज्ञाः न प्रति-ु प्रभवेयुः ।

64. Ein Unglück kommt selten allein.

Misfortune never comes singly.

"विपद् विपदमनुबध्नाति ।"

"सङ्गचारिणोऽनर्थाः ।"

"छिद्रेष्वनर्था बहुलीभवन्ति ।"

65. Ende gut, alles gut.

All's well that ends well.

सर्वं स्वन्तं मनोरमम् ।

[सब भाल यार शेष भाल । ब]

66. Er sitzt zu Pferde und sucht darnach.
He sits on horseback and looks for the horse.

"हस्तगतं माणिक्यमापणे मृग्यते।"
"अश्वारूढाः कथं चाश्वान् विस्मरेयुः सचेतसः।"

67. Es beisst kein Hund den andern.
One hound does not bite another.

न खलु श्वा श्वानं दशति।
न खलु वृको वृकं भक्षयति।

68. Ein Wolf frisst den andern nicht.
One wolf does not eat another.

न खलु वृको वृकं भक्षयति।
"न खलु भिक्षुको भिक्षुकं प्रतियाचते।"
[काकेर मांस काके खाय ना। व]

69. Es fliegt keine Taube dem Müssigen Maul.
Schlafender Fuchs fängt kein Huhn.
Die gebratenen Tauben fallen einem n ins Maul.

न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः।

70. Es ist nicht alles Gold was glänzt.
All that glitters is not gold.

न हि यदेव प्रोज्ज्वलं तदेव सुवर्णम्।

71. Es Können nicht alle alles .

"न हि सर्वविदः सर्वे ।"

"सर्वः सर्वं न जानाति सर्वज्ञो नास्ति कश्चन ।

नैकत्र परिनिष्ठास्ति ज्ञानस्य पुरुषे क्वचित् ॥"

'क्वचिन् कश्चित् प्रगल्भते न हि सर्वः सर्वं जानाति ।"

72. Es sind nicht alle Mönche, die schwarze Kappen tragen.

The cowl does not make the monk.

"न लिङ्गं यतिकारणम्" (विष्णुपुराणम्) ।

73. Fische fängt man mit der Angel und Leute mit den Worten.

Fish are caught with hooks and men with words.

गृह्यन्ते मत्स्या बडिशेन मनुजाश्च वचनेन ।

74. Fliegen und Freunde kommen im Sommer.

Flies and friends come in summer.

मित्राणि मक्षिकाश्चैव मधौ प्रादुर्भवन्ति हि ।

[वसन्तेर कोकिल । व]

[परोऽपि बन्धुः समसंस्थितस्य मित्रं न कश्चिद् विषमस्थितस्य।]

75. Gebrannt' Kind fürchtet das Feuer.

A burnt child dreads the fire.

"Once bit, twice shy."

पाणौ पायसदग्धे तक्रमपि पामरः फूत्कृत्य पिबति ।

[घरपोड़ा गरु सिँदूरे मेघ देखले डराय । व]

[सर्प डसलेल्यास दोड़ीचें भय । म]

Ein verbrühter Hund fürchtet sich auch kaltem Wasser.

Begossene Hunde fürchten das Wasser.

76. Gemalte Blumen riechen nicht

A painted flower gives no smell.

न खलु चित्रगतानि कुसुमान्युद्वहन्ति सौरभम् ।

77. Geteilter Schmerz ist halber Schmerz.
Geteiltes Leid ist halbes Leid.

स्निग्धजनसंविभक्तं हि दुःखं सह्यवेदनं भवति ।

"Geteilter Schmerz ist nicht mehr Schm
Geteilte Wonnen nur sind Wonnen,
Geteilte Freud' ist ganze Freude,
Geteilter Schmerz geheilter Schmerz."

Sorrow if shared can be endured.
Our only joys are those we share.
Enjoyment shared is true enjoyment.
Sorrow when shared is sorrow cured.

संविभक्तं दुःखं दुःखमेव न भवति ।
संविभक्ता एव आनन्दाः परमार्थत आनन्दाः ।
संविभक्तं च सुखं पूर्णं सुखम् ।
संविभक्तं दुःखं समीकृतं दुःखम् ।

78. Gleich und gleich gesellt sich gern.

Birds of a feather flock together.

"सर्वः सगन्धेषु विश्वसिति ।"

"मृगा मृगैः सङ्गमनुव्रजन्ति
गावश्च गोभिस्तुरगास्तुरङ्गैः ।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः
समानशीलव्यसनेषु सख्यम् ॥"

[Wo Aas ist, da versammeln sich die Geier.
Wo Tauben sind, da fliegen Tauben zu.
Jung zu Jung und Alt zu Alt
jeder sich zu sein gleichen halt.
Schöne Seelen finden sich.]

79. Guter Wein braucht keinen Aushänge-schild.

80. Gute Ware lobt sich selbst.

Good wine needs no bush.

"गुणेषु यत्नः क्रियतां किमाटोपैः प्रयोजनम् ।
विक्रीयन्ते न घण्टाभिर्गावः क्षीरविवर्जिताः ॥"

81. Grosse Baüme geben mehr Schatten als Früchte.

Great boast, little roast.

A great head and a little wit.

महामहीरुहा यथा छायां ददति न तथा फलानि ।

82. Heute mir, morgen dir.

अद्य मे श्वस्ते ।

83. Honig in Munde, Galle im Herzen.

84. Zucker auf der Zunge, Galle im Herzen.

"विषकुम्भं पयोमुखम् ।"

"मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ।"

85. Hunger ist der beste Koch.

Hunger is the best sauce.

"सम्पन्नतरमेवान्नं दरिद्रा भुञ्जते सदा ।
क्षुत् स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥"

86. Ich lebe, ich weiss nicht wie lang',
ich sterbe, ich weiss nicht wann,
ich fahre, ich weiss nicht wohin,
mich wundert, dass ich noch fröhlich bin.

I live, I do not know how long,
I die, I do not know when.
I travel, I do not know whither.
I wonder, I am yet merry.

जीवामि सत्यं न जाने कियच्चिरम्, म्रियेऽपि तावन्न जाने कदानीम्, व्रजामि नूनं न विजानामि कुत्र, तथापि हृष्यामीति विस्मयो मे ।

87. In eine Stunde
heilt keine Wunde.

No wound heals in an hour.

न खलु होरामात्रेण रोहति क्षतम् ।

88. In kräftiger Hand ist jede Waffe gut.

In the hand of the strong, all weapon is good.

निपुणपाणौ सर्वमेवास्त्रं शोभनम् ।

[ये खेलते पारे से काणा कड़िंतेओ खेलते पारे । व—
यस्य क्रीडने नैपुण्यमस्ति स काणवराटिकयापि क्रीडितुं शक्नोति ।]

89. Iss was gar ist,
trink was klar ist,
sprich was wahr ist.

Eat what is roasted,
drink what is pure,
speak what is true.

पक्वं भुङ्क्ष्व, स्वच्छं पिब, सत्यं वद ।

90. Jahre scheinen den Frohen nur Tage.

Years appear as days to the happy.

सुखिनो हि वर्षाण्यपि वासरायन्ते ।

91. Jede Stunde dünkt dem Unglücklichen eine lange Winternacht.

Every hour appears a long winternight to the unhappy.

दुःखितस्य हि होरापि शीतनिशायते ।

92. Jeder findet sein Liebchen schön.
Every one finds his beloved beautiful.
स्वां प्रियां सुन्दरीं पश्यति सर्वः।
"तस्य तदेव हि मधुरं यस्य मनो यत्र संलग्नम्।"

93. Jeder ist seines Glückes Schmied.
Man is the architect of his own fortune.
सर्व एवात्मनो भागधेयस्य नियन्ता।
"लोके गुरुत्वं विपरीततां वा
स्वचेष्टितान्येव नरं नयन्ति।"

94. Jeder meint sein Kuckuck singe besser al des andern Nachtigall.
Every one thinks his cuckoo sings better than others nightingales.
"Every one thinks his own geese swans"
"सर्वः कान्तमात्मीयं पश्यति।"
मदीयः काकोऽपरस्य पिकादपि मधुरतरं रौतीति मन्यते सर्वः।
[आपनार छेलेटी खाय एतटी वेड़ाय येन लाटिमटी।
परेर छेलेटा खाय एनटा वेड़ाय येन बाँदरटा॥ व
आपलें तें बापडें दुसऱ्याचें तें कारटें। म]

95. Jeder will lange leben, aber niemand wil alt sein.
Every one wishes to live long, but no one wants t get old.
सर्व एव चिरजीवितां कामयते, कोऽपि पुनर्वृद्धभावं नेच्छति।

96. Je mehr man hat, desto mehr will man haben.

The appetite grows with what it feeds upon.

"न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते ॥"
"निःस्वो वष्टि शतं शती दशशतं लक्षं सहस्राधिपो
लक्षेशः क्षितिपालतां क्षितिपतिश्चक्रेशवत् सम्पदम् ।
चक्रेशः पुनरिन्द्रतां सुरपतिर्ब्रह्मास्पदं वाञ्छति
ब्रह्मा विष्णुपदं हरिर्हरपदमाशावधिं को गतः ॥"
[यार छेले यत पाय, तार छेले तत चाय । व]

97. Jenseits des Berges wohnen auch Leute.

पर्वतमुभयतोऽपि निवसन्त्येव जनाः ।

98. Keine Antwort ist auch eine Antwort.

Silence gives consent.

मौनं सम्मतिलक्षणम् ।

99. Keine Freud' ohne Leid.

No pains, no gains.

न हि सुखं दुःखैर्विना लभ्यते ।
["कष्ट ना करिले केष्ट पाओया याय ना ।" व
"दुःख विना सुख लाभ हय कि महीते ।" व]

100. Keine Rosen, ohne Dornen.

There is no rose without a thorn.

No joy without alloy.

नास्ति कमलं कण्टकं विना ।

101. Keine Haus, ohne Maus.

No house, without mouse.

न गृहं मूषिकशून्यम् ।

102. (Es ist) kein Tag ohne Nacht, kein Leid ohne Freud.'

There is no day without night, no sorrow without joy.

न रात्रिर्दिवसं विना, न च दुःखं विना सुखम् ।

103. Kinder und Narren reden die Wahrheit.

Children and fools speak the truth.

बालाश्च बालिशाश्चैव सत्यं वदन्ति नेतरे ।

[तथाच ऐतरेयब्राह्मणम् (१।६)—कोऽर्हति मनुष्यः सर्वं सत्यं वदितुम् ? सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति ।]

104. Krankheit kommt zu Pferde und geht zu Fuss weg.

Illness comes on horseback and departs on foot.

आगच्छति यदा व्याधिरश्वमारुह्य वेगितः ।

निर्गच्छति यदा व्याधिः पङ्गुवामेव शनैः शनैः ॥

105. Kommt Armut ins Haus,
Geht die Liebe zum Fenster hinaus.

When poverty comes in at the door, love goes out at the window.

प्रविशति भवनं दारिद्र्ये विनिर्गच्छति प्रेम गवाक्षमार्गेण ।

106. Kummer macht graue Haare.
Kummer macht schnell alt.

Care will kill a cat.

चिन्ता जरा मनुष्याणाम् ।

107. Leere Ähren stehen hoch.

The boughs that bear most hang lowest.

"भवन्ति नम्रास्तरवः फलागमैः ।"

108. Leere Töpfe klappen am meisten.

109. Leere Köpfe plappern am meisten.

Empty vessels make the greatest sound.
Empty heads babble the most.

"अर्धो घटो घोषमुपैति नूनम् ।"
"सम्पूर्णकुम्भो न करोति शब्दम् ।"
"न सुवर्णे ध्वनिस्तादृग् यादृक् कांस्ये प्रजायते ।"
"रिक्तः सर्वो भवति हि लघुः पूर्णता गौरवाय ।"
"निःसारस्य पदार्थस्य प्रायेणाडम्बरो महान् ।"

110. Hennen die viel gackern, legen wenig Eier.

यास्तावत् कुक्कुट्यः समधिकं रुवन्ति ता अल्पीयांस्यण्डानि सुवते ।

111. Hunde, die viel bellen, beissen nicht.
Barking dogs seldom bite.
ये तावन् कुक्कुराः समधिकं भषन्ति ते नैव दशन्ति ।

112. Stumme Hunde und stille Wasser sind gefährlich.
मूकाः श्वानः स्तिमितानि च सलिलानि भीतिस्थानानि ।
[उथळ पाण्याला खळखळी फार व दुबळे माणसाला बढाई फार । म]

Lehre nicht andere bis du selber gelehrt bist.
स्वयं यावन्न विनीतोऽसि तावत् परान् विनेतुं मा यतस्व ।
"स्वयमसिद्धः कथमन्यान् साधयेत् ।"

113. Macht geht vor Recht.
Might is stronger than right.
"अति धर्माद्बलं मन्ये बलाद्धर्मः प्रवर्तते ।"
"धूमो वायोरिव वशे बलं धर्मोऽनुवर्तते ।
अनीश्वरो बले धर्मो द्रुमे वल्लीव संश्रिता ॥"
"बलवांश्च यथा धर्मं लोके पश्यति पुरुषः ।
स धर्मो धर्मवेलायां भवत्यभिहितः परः ॥"
"बलवन्तो ह्यनियमा नियमा दुर्बलीयसाम् ।"
"यस्यैव बलमोजश्च स धर्मस्य प्रभुर्नरः ।"
"वशे बलवतां धर्मः सुखं भोगवतामिव ।
नास्त्यसाध्यं बलवता सर्वं बलवतां शुचि ॥"

[जोर यार मुल्क तार । व
सत्तेपुढें शहाणपण चालत नाहीं । म]

114. Man darf nicht die Perlen vor die Säue werfen.

To cast pearls before swine.

न खलु शूकराणां पुरस्तान्मौक्तिकानि विकिरेत् ।
"किं मृष्टमन्नं खरशूकराणाम् ।"
[उलुवने मुक्ता छड़ान । व—शरवणे मौक्तिकविक्षेपणम्]

115. Man erkennt den Baum an seiner Frucht.

A tree is known by its fruit.

"शालिश्यामाकयोर्भेदः फलेन परिचीयते ।"

116. Man isst um zu leben, aber man lebt nicht um zu essen.

Man eats to live and does not live to eat.

जीवनायैव भुञ्जीत न तु भोजनाय जीवेत् ।

117. Man muss das Pferd nicht hinter den Wagen spannen.

To put the cart before the horse.

न खलु शकटस्य पश्चाद् युञ्जीत वाहम् ।

118. Man schmeichelt dem Hunde des Herrn wegen.

The dog is flattered for the sake of its master.

यच्छुनकं चाटुवचनैराराधयति तत्तस्य स्वामिनः कृते ।

119. Müssiggang ist aller Laster Anfang.

Idleness is the root of all vices.

आलस्यमेव सर्वेषां पापानां मूलम् ।

120. Nicht alle Wolken bringen Regen.

All clouds do not bring rain.

"रे रे चातक सावधानमनसा मित्र क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वे तु नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद्वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥"

121. Niemand kann über seinen Schatten springen.

No one can cross his own shadow.

कोऽपि स्वां छायामतिक्रमितुं न प्रभवति ।
"न हि सुशिक्षितोऽपि नटवटुः स्वस्कन्धमारोढुं प्रभवति ।"

122. Nimm viel ein, gib wenig aus,
dann hast du stets Geld im Haus.

Acquire much, spend little and you will always have money in your house.

यः प्रभूतमङ्गीकरोति स्वल्पं च व्ययीकरोति न तं मुञ्चति लक्ष्मीः ।

123. Not kennt kein Gebot.

Necessity knows no law.

"आतुरे नियमो नास्ति ।"

124. Raten ist wohlfeil.

Advice is cheap.

"उपदेशस्तावत् सुलभः ।"

125. Reden ist Silber, Schweigen ist Gold.

Speech is silver, silence is gold.

भाषणं रजतं प्रोक्तं सुवर्णं मौनमुच्यते ।

"मौनं सर्वार्थसाधकम् ।"

"मौनं विधेयं सततं सुधीभिः ।"

126. Rede wenig, aber wahr.

ऋतं ब्रूयान्मितं ब्रूयात् ।

127. Sage mir, mit wem du umgehst, und ich will dir sagen wer du bist.

Tell me the company you keep and I will tell you what you are.

"यादृशैः सन्निविशते यादृशांश्चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग् भवति पुरुषः ॥"

"संसर्गजा दोषगुणा भवन्ति ।"

128. Sagen und Tun ist zweierlei.

It is one thing to say and another to do.

महत् खल्वन्तरं भाषणस्यानुष्ठानस्य च ।

वचनं करणञ्च विभिन्ने ।

वक्तुं सुकरं दुष्करमनुष्ठातुम् ।

129. Versprechen und Halten ist zweierlei.

It is one thing to promise, another to perform.

प्रतिज्ञा पालनञ्च भिन्ने एव ।

130. Sag' nicht alles, was du weisst,
glaub' nicht alles, was du hörst,
tu nicht alles, was du kannst.

Say not all that you know,
Believe not all that you hear,
Do not all that you can.

यद् यत् वेत्सि तत् सर्वं मा ब्रूहि, यद् यच्छृणोषि तत् सर्वं मा श्रद्धत्स्व, यद् यच्छक्नोषि तत् सर्वं मा कुरु ।

131. Schöne Blumen stehen nicht lange am Wege.

Beautiful flowers do not remain long on the way-side.

न हि कमनीयानि कुसुमानि चिरं रथ्यायां तिष्ठन्ति।

132. So lange der Narr schweigt, hält man ihn für klug.

A fool is regarded as a clever person so long as he remains silent.

यावत् तूष्णीं तिष्ठति मूर्खस्तावत् प्राज्ञो मन्यते पुरुषैः ।

"तावच्च शोभते मूर्खो यावत् किञ्चिन्न भाषते ।"

133. Sorge für das Pferd, als wäre es dir Freund,
reite es, als wäre es dein Feind.

मित्रवदुपचरेदश्वं शत्रुवच्चैव वाहयेत् ।

134. Bei den Blinden ist der einäugige König.

135. Unter den Blinden ist der einäugige König.

Among the blind is the one-eyed king.

"अन्धानां काणो राजा ।"

["यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ॥

निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥"

अन्धो मे काणो राजा । हि । अंधल्यांत काणा राजा । म]

136. So viel Köpfe, so viel Sinne.

So many men, so many minds.

यावन्तः पुरुषास्तावन्ति मतानि ।

"विचित्ररूपाः खलु चित्तवृत्तयः ।"

"नासौ मुनिर्यस्य मतं न भिन्नम् ।"

137. Sprich wenig, tue viel.

"मितं ब्रूहि, अमितं कुरु ।

138. Übung macht den Meister.

Practice makes perfect.

"अभ्यासो हि कर्मणां कौशलमावहति ।"

"न हि सकृन्निपातमात्रेणोदबिन्दुरपि ग्रावणि निम्नतामादधाति ।"

139. Es fällt kein Meister vom Himmel.

न खलु दिवः पतति विशेषज्ञः ।

[" अज्ञोऽपि तज्ज्ञतामेति शनैः शैलोऽपि चूर्ण्यते ।
घुणोऽप्यत्ति महावृक्षं पश्याभ्यासविजृम्भितम् ॥"]

140. Unzeitige Wahrheit ist eine Lüge gleich.
अनवसरे कथितं सत्यमपि मृषायते ।

141. Verbotene Frucht schmeckt am besten.
The fruit that is forbidden tastes most sweet.

प्रतिषिद्धमेव फलं सुतरां स्वदते ।
"प्रायो वारितवामा हि प्रवृत्तिर्मनसो नृणाम् ।"
[निषिद्ध वस्तूवर आवड फार । म]

142. Viele Köche verderben den Brei.
Too many cooks spoil the broth.

सूदबाहुल्यं सूपनाशाय ।
"अनेके कर्मिणो यत्र तत्र कार्यं विनश्यति ॥"
[अनेक सन्न्यासीते गाजन नष्ट । व
भागेर मा गङ्गा पाय ना । व
सतरा सुइणी विणारनीचा नाश । म]

143. Vom Regen unter die Traufe kommen.
From the frying pan into the fire.

वर्षणभयात् पलायमनस्यच्छदिषोऽधस्तात् समागमनम् ।
' वृश्चिकभिया पलायमान आशीविषमुखे निपतितः ॥"
"पाशदर्शनभयपलायितस्य फणिनि पदन्यासः ।"

[आगीतून निघालें आणि फोपाट्यांत पडलें ।
चुलींतून निघून वैलांत पडणें]

144. Vor der Tat, halte Rat,
nach dem Rat, greif zur Tat.

Before embarking on any enterprise, hold counsel.
After counsel grasp the deed firmly.

करिष्यन् किमपि कार्यं मन्त्रयस्व विशेषतः ।
मन्त्रादूर्ध्वं दृढतरमभियुज्यस्व कर्मणि ॥

145. Vorsicht ist besser als Nachsicht.

Prevention is better than cure.

"उत्पन्नानर्थप्रतीकारादनर्थोत्पत्तिप्रतिबन्ध एव वरम् ।"
"प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ।"

146. Was drei wissen, wissen bald dreissig.

What is known to three soon becomes known to thirty.

यत् खलु त्रयाणां विज्ञातं तदचिरात् त्रिंशतो विज्ञातं भवति ।
"षट्कर्णो भिद्यते मन्त्रः ।"
"एकः परगृहं गच्छेद्द्वितीयेन तु मन्त्रयेत् ।"

147. Was du heute tun kannst, spare nicht auf morgen.

Never put off till to-morrow what you can do to-day.

"श्वः कार्यमद्य कुर्वीत पूर्वाह्णे चापराह्णिकम् ।"
"न श्वः समुपासीत । को हि मनुष्यस्य श्वो वेद ।"

—श. ब्रा. २।१।३।६

148. Was du nicht willst das man dir tu', da füg auch keinen andern zu.

Do unto others as you would be done by.

"यदन्यैर्विहितं नेच्छेदात्मनः कर्म पुरुषः ।
न तत् परेषु कुर्वीत जानन्नप्रियमात्मनः ॥"
"यदि नेष्टात्मनः पीडा मा सञ्जि भवता जने ।"
"आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।"

149. Was du tust, bedenke das Ende.

Whatever you do, think of the end.

"गुणवदगुणवद्वा कुर्वता कार्यमादौ
परिणतिरवधार्या यत्नतः पण्डितेन ।"
"किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
इति सञ्चिन्त्य मनसा प्राज्ञः कुर्वीत वा न वा ॥"

150. Wem die Sonne scheint, der fragt nicht nach die Sternen.

न खलु सूर्यालोकमनुभवन् कोऽपि नक्षत्रस्य वार्तां पृच्छति ।

[तथाच रघुवंशे कालिदासः—
"मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ॥
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥"]

151. Wenig ist besser als gar nicht.

Half a loaf is better than no bread.

"बधिरान्मन्दकर्णः श्रेयान् ।"

"उपवासाद्वरं भिक्षा ।"

"मरणाद्वरं व्याधिः ।"

"अत्यन्तपराजयाद्वरं संशयोऽपि ।"

"मरणाय गृहीतोऽङ्गच्छेदं स्वीकरोति ।"

"एकाङ्गहीनं ह्यस्त्रेण मरणाज्जीवितं वरम् ।"

"सर्वनाशे समुत्पन्ने अर्धं त्यजति पण्डितः ।"

152. Wenn das Pferd gestohlen ist, schliesst man den Stall zu.

Shutting the stable-door after the horse is stolen.

153. Wenn die Kuh gestohlen ist, verwahrt man den Stall.

When the cow is stolen, the stable is guarded.

154. Wenn das Kalb gestohlen ist, bessert der Bauer den Stall.

When the calf is stolen, the rustic repairs the cow-shed.

155. Wenn's Kalb ertrunken ist, deckt der Bauer den Brunnen zu.

When the calf is drowned, the peasant covers the well.

अपहृते अश्वे पिदधाति मन्दुराद्वारम् ।
अपहृतायां गवि गोष्ठं रक्ष्यते ।
अपहृते वत्से संस्करोति गोष्ठं हालिकः ।
निमग्ने वत्से समाच्छादयति कूपं कर्षकः ।
"पाटच्चरलुण्ठितेषु भवनेषु जाग्रतोऽपि यामिकाः
किमुपकरिष्यन्ति ।"

"मुण्डितमुण्डो नक्षत्राणि पृच्छति ।"
"किं गते विवाहे नक्षत्रपरीक्षया ।"
["निर्वाणदीपे किमु तैलदानं
चौरे गते वा किमु सावधानम् ।
वयोगते किं वनिताभिलाषः
पयोगते किं खलु सेतुबन्धः ॥"
"चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥"
"अनागतविधानं तु कर्तव्यं शुभमिच्छता ।
आपदाशङ्कमानेन पुरुषेण विपश्चिता ॥"

चोर पालाले बुद्धि वाड़े । व
बैला गेला झोप केला । म
घर जळल्यावरी पाण्याचा शोध करी । म
धण्डी गेली वण्डी केली । म]

156. Was ist nicht zu meiden,
das soll man willig leiden.

What cannot be cured must be endured.

"अप्रतीकारे कर्मणि प्रहरणानि विडम्बनाय ।"

157. Wenn der Esel nicht will, so muss er.

If the ass will not, he must.

यदि गर्दभः स्वेच्छातो न करोति तर्हि प्रसह्यासौ कार्यते ।

158. Wenn die Maus satt ist, schmeckt das Mehl bitter.

तृप्ताय मूषिकाय कटु स्वदते समिता ।
"अपां हि तृप्ताय न वारिधारा
स्वादुः सुगन्धिः स्वदते तुषारा ।"

159. Wenn einer nicht hören will, da ist alles Reden umsonst.

When one would not listen, everything said to him is futile.

"नष्टं समुद्रे पतितं नष्टं वाक्यमशृण्वति ।"

160. Wenn man den Hund hängen will, findet man auch den Strick.

To give a dog a bad name and then hang it.

यदा श्वानं नाशयितुमिच्छति तदा तस्मिन् दोषमुद्भावयति ।

161. Wer Butter auf dem Kopfe hat,
der gehe nicht in die Sonne.

यस्य शिरसि नवनीतं तेनातपे नैव गन्तव्यम्।

162. Wer in einem Glashause sitzt, soll ande
nicht mit Steinen werfen.

Those who live in glasshouses ought not to thro
stones at others.

यः काचभवने निषीदति तेनान्यस्मिन् दृषदो न मोक्तव्याः।

163. Wer das Feuer haben will, muss de
Rauch leiden.

अनलार्थिना धूमः सोढव्यः।

164. Wer einem hohen Berg ersteigen will,
muss anfangs kleine Schritte machen.

He who would ascend a high hill must at first mov
with slow steps.

यो हि पर्वतमारोढुमिच्छति तेन प्रथमतः शनैः शनैः पदक्षेपः कार्यः।
"शनैः पन्थाः शनैः कन्था शनैः पर्वतलङ्घनम्।"

165. Wer einal lügt, dem glaubt man nicht,
und wenn er auch die Wahrheit spricht.

He who once tells a lie is not believed even when
he speaks the truth.

यो हि सकृन्मिथ्या वदति सत्यं वदत्यपि तस्मिन कोऽपि न
विश्वसिति।

166. Wer im Scherz in den Fluss springt,
kann im Ernst darin ertrinken.

He who springs into the river in jest is likely to get drowned in earnest.

यो हि परिहासेन नद्यां निपतति स परमार्थतस्तत्र निमज्जेत् ।

167. Wer kauft was er nicht braucht,
muss bald verkaufen was er braucht.

He who buys what he does not need, must soon sell what he does need.

यो ह्यनपेक्षितं वस्तु क्रीणाति, तेन ह्यचिरादनिच्छताप्यपेक्षितमपि वस्तु विक्रेतव्यम् ।

Wer nichts wagt, gewinnt nichts.

Nothing venture, nothing have.

"न संशयमनारुह्य नरो भद्राणि पश्यति ।"

168. Wer sich entschuldigt, ehe man klagt,
der klagt sich selbst an.

He who excuses himself, before he is accused, accuses himself.

Qui s excuse, s'accuse (French).

यो दूषणात् पूर्वं स्वत एवात्मनो निर्दोषत्वं प्रतिपादयति स स्वं दोषमेव ख्यापयति ।

[ठाकुर घरे के ? आमि त कला खाइ नि । व—कश्चिद्देवपूजनकक्षे देवार्थं रक्षितानि कदलीफलानि भक्षयन्नासीत् । बहिः केनापि

कस्तावद्देवगृहे इति पृष्टे तेनोक्तम्, न खलु मया भुक्तानि कदली फलानीति]

170. Wer vor dir von andern schlecht spricht, der spricht auch vor andern schlecht vo dir.

He who speaks ill of others before you, speaks of you before others.

यस्तव पुरत इतरान् परिवदति स इतरेषां पुरतस्त्वामपि परिवदेत् ।

171. Wess Brot ich esse, dess Lied ich singe.

Of whom you eat salt, him laud and exalt.

यस्यान्नं तस्य गीतम् ।

[नुण खाइ यार गुण गाइ तार । व

ज्याची खावी पोळी त्याची वाजवावी टाळी । म]

172. Wie das Kleid, so der Mann.

यादृशो वेषस्तादृशो जनः ।

वेष एव सूचयति जनस्य सारासारौ ।

173. Kleider machen Leute.

Fine feathers make fine birds.

वेष एव विदधाति जनं (सुन्दरमसुन्दरं वा) ।

174. Wie der Baum, so die Frucht.

As the tree, so its fruit.

यथा वृक्षस्तथा फलम् ।

["यथा देशस्तथा भाषा, यथा राजा तथा प्रजाः ।
यथा भूमिस्तथा तोयं यथा बीजं तथाङ्कुरः ॥"
"जसे झाड, तसें फल ।" म]

175. Wie der Herr, so der Diener.
Like master, like man.

यथा प्रभुस्तथा प्रेष्यः ।

176. Wie der Vogel, so das Ei.

यादृशी कुक्कुटी तादृशमण्डम् ।

177. Wie die Arbeit, so der Lohn.

यादृशं कर्म तादृशी भृतिः ।
"यथा कर्म तथा लाभः ।"

178. Wie die Frage, so die Antwort.

यादृशः प्रश्नस्तादृशं प्रतिवचनम् ।

179. Wie die Quelle, rein und klar,
sei die Rede zart und wahr.

Like the spring, clear and transparent be your words gentle and true.

यथा प्रसन्नं स्वच्छञ्च निर्झरसलिलं सदा ।
तथा ब्रूया वचः सत्यं मनोज्ञञ्चापि सर्वदा ॥

180. Wie die Saat, so die Ernte.

"यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वापि तादृशं लभते फलम् ॥"
"यो यो यथा प्रयतते स स तत्तत्फलैकभाक् ।"

181. Wie die Ware, so das Geld.

यादृशं पण्यं तादृशं कार्षापणम् ।

182. Wie du mir, so ich dir.

Tit for tat. For the civil civility, for the sau-sauce.

"यस्मिन् यथा वर्तते यो मनुष्य-
स्तस्मिंस्तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः
साध्वाचारः साधुना प्रत्युपेयः ॥"
"सारल्यं सरले कुर्याच्छठे शाठ्यं समाचरेत् ।"
"पिशाचानां पिशाचभाषयैवोत्तरं देयम् ।"
[अरे तर कारे अहो तर कायहो । म]

183. Wie man sich bettet so schläft man.

As you make your bed, so must you lie on it.

यादृशीं शय्यामारचयति मनुष्यस्तादृशी तस्य निद्रा ।

184. Wie man zahlt, so wird man bedient.

As one pays, so is one served.

यादृशं वेतनं ददाति तादृशीं सेवां लभते ।

185. Wo eine Wille ist, ist ein Weg.

Where there is a will, there is a way.

इच्छा चेदस्ति, उपायोऽपि विद्यते ।

186. Wohlfeil kostet viel Geld.

ईषदर्घं परमार्थतो महार्घम् ।

[सस्तार तिन अवस्था । व]

187. Zeit bringt Rosen.

कालः समानयति कमलानि ।

188. Zeit heilt alle Wunden.

Time heals all wounds.

कालो विरोपयति क्षतान्यखिलानि ।

का ःन मन्दीभवन्ति दुःखानि सर्वाणि ।

189. Zeit ist Geld.

Time is money.

कालो द्रव्यम् ।

190. Zornes Ausgang ist der Reue Anfang.

The departure of anger is the beginning of repentance.

क्रोधस्यान्तोऽनुतापस्यादिः ।

अनुशयानुबन्धी क्रोधः ।

191. Zum Lernen ist keiner zu alt.
No one is too old to learn.
"गतेऽपि वयसि ग्राह्या विद्या सर्वात्मना बुधैः।"

192. Zu Nacht sind alle Katze grau.
When the light's away, all cats are grey.
सर्वे मार्जाराः शोभना निशायाम्।
तिमिरे का न सुन्दरी ?

193. Zu viel Reden und zu viel Schweig[e]
das ist allen Narren eigen.
अतिवादोऽतिमौनञ्च बालिशस्यैव लक्षणम्।

194. Zwischen zwölf Uhr und Mittag,
Gar vieles noch geschehen mag.
There is many a slip 'twixt the cup and the lip.
"विघ्नवत्यः प्रार्थितार्थसिद्धयः।"
"श्रेयांसि बहुविघ्नानि।"
"प्रायेण सत्यपि हितार्थकरे विधौ हि।
श्रेयांसि लब्धुमसुखानि विनान्तरायैः॥"